# श्रीमद् भागवत रसिक कुटुंब

## सर्वैश्वर्यप्रद लक्ष्मी कवच

**श्रीमधुसूदन उवाच**

**गृहाण कवचं शक्र सर्वदुःखविनाशनम्। परमैश्वर्यजनकं सर्वशत्रुविमर्दनम्।।**

**ब्रह्मणे च पुरा दत्तं संसारे च जलप्लुते।**

**यद् धृत्वा जगतां श्रेष्ठः सर्वैश्वर्ययुतो विधिः।।**

**बभूवुर्मनवः सर्वे सर्वैश्वर्ययुता यतः।**

**सर्वैश्वर्यप्रदस्यास्य कवचस्य ऋषिर्विधिः।।**

**पङ्क्तिश्छन्दश्च सा देवी स्वयं पद्मालया सुर।**

**सिद्धैश्वर्यजपेष्वेव विनियोगः प्रकीर्तित।**

**यद् धृत्वा कवचं लोकः सर्वत्र विजयी भवेत्।।**

**।।मूल कवच पाठ।।**

**मस्तकं पातु मे पद्मा कण्ठं पातु हरिप्रिया।**

**नासिकां पातु मे लक्ष्मीः कमला पातु लोचनम्।।**

**केशान् केशवकान्ता च कपालं कमलालया।**

**जगत्प्रसूर्गण्डयुग्मं स्कन्धं सम्पत्प्रदा सदा।।**

**ॐ श्रीं कमलवासिन्यै स्वाहा पृष्ठं सदावतु।**

श्रीं पद्मालयायै स्वाहा वक्षः सदावतु।
पातु श्रीर्मम कंकालं बाहुयुग्मं च ते नमः।।
ॐ ह्रीं श्रीं लक्ष्म्यै नमः पादौ पातु मे सततं चिरम्।
ॐ ह्रीं श्रीं नमः पद्मायै स्वाहा पातु नितम्बकम्।।
ॐ श्रीं महालक्ष्म्यै स्वाहा सर्वांगं पातु मे सदा।
ॐ ह्रीं श्रीं क्लीं महालक्ष्म्यै स्वाहा मां पातु सर्वतः।।

।।फलश्रुति।।

इति ते कथितं वत्स सर्वसम्पत्करं परम्।
सर्वैश्वर्यप्रदं नाम कवचं परमाद्भुतम्।।
गुरुमभ्यर्च्य विधिवत् कवचं धारयेत्तु यः।
कण्ठे वा दक्षिणे बाहौ स सर्वविजयी भवेत्।। महालक्ष्मीर्गृहं तस्य न जहाति कदाचन।
तस्य छायेव सततं सा च जन्मनि जन्मनि।।
इदं कवचमज्ञात्वा भजेल्लक्ष्मीः सुमन्दधीः।
शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः।।

इति श्रीब्रह्मवैवर्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे
श्रीलक्ष्मीकवचवर्णनं नामद्वाविंशोऽध्यायः ॥